APPENDIX - I

(I.) ब्रह्माण्ड पुराण

1. शैब्या धन्यानि देवीनां सहस्राणि च षोडशे ।
चतुर्दश तु ये प्रोक्ता गणाश्चाप्सरसां दिवे ॥ (P.III. 71.243)

2. विचार्य देवैः शक्रेण विशिष्टास्त्विह प्रेषिताः ।
पत्न्यर्थं वासुदेवस्य उत्पन्ना राजवेश्मसु ॥ (P.III. 71.244)

3. चतुर्विंशाश्चावरजास्तेषामप्सरसः शुभाः ।
अरूणा चानपाया च विमनुष्या वरांबरा ॥ (P.III. 7.5)

4. मिश्रकेशी तथाचासिपर्णिनी चाथलंबुषा ।
मारीचिः शुचिमा चैव विद्युत्पर्णा तिलोत्तमा ॥ (P.III, 7.6)

5. अद्रिका लक्ष्मणा क्षेमा दिव्या रंभा मनोभवा ।
असिता च सुबाहुश्च सुप्रिया सुभुजा तथा ॥ (P.III 7.7)

6. पुंडरिका जगन्धा च सुदती सुरसा तथा ।
तथैवासा सुबाहुश्च विख्यातौ हहाहुहू ॥ (P.III, 7.8)

(II.) भागवतपुराण

7. ततश्चाप्सरसो जाता निष्ककण्ठ्यः सुवाससः ।
रमण्यः स्वर्गिणां वल्गुगतिलीलावलोकनैः ॥ (VIII. 8.7)

8. गन्धर्वाप्सिसरसः काम वसन्तमलयानिलौ ।
मुनये प्रेषयामास रजस्तोकमदौ तथा ॥ (XII. 8.16)

9. इति प्रगृणतां तेषां स्त्रियोऽत्यद्भुत दर्शनाः ।
दर्शयामास शुश्रूषां स्वर्चिता कुर्वतीर्विभुः ॥ (XI. 4.12.)

10. ते देवानुचरा दृष्ट्वा स्त्रियः श्रीरिव रूपिणीः ।
गन्धेन मुमुदुस्तासां रूपौदार्यहतश्रियः ॥ (XI. 4.13)

11. तानाह देवदेवेशः प्रणतान् प्रहसन्निव ।
आसामेकतमां वृङ्ध्वं सवर्णां स्वर्गभूषणाम् ॥ (XI. 4.14)

12. ओमित्यादेशमादाय नत्वा तं सुरवन्दिनः ।
उर्वशीमप्सरःश्रेष्ठां पुरस्कृत्य दिवं ययुः ॥ (XI. 4.15)

(III) मत्स्यपुराण

13. मुनिर्मुनीनोन्वगणं गणमत्सरसां तथा ।
तथा किन्नरगन्धर्वामरिष्टाजनयद्बहून् ॥ (6.45)

14. गन्धर्वैश्वपुरादुग्धावत्सं धासाप्सरोगणैः ।
वत्सं चैत्ररथंकृत्वा गंधान्पद्मदले यथा ॥ (10.24)

(IV.) वायुपुराण (आनन्दाश्रम संस्करण, सं. 49 - 1983)

15. तत सृजति भूतानि स्थावराणि चराणि च ।
यक्षान्पिशाचान्गधर्वास्तथैवाप्सरसां गणान् ॥ (9.55)

16. अप्सरोगणसंघाश्च समाजग्मु रनेकशः ।
ववौ शिव सुखौ वायुर्नानागन्धवाः शुचि ॥ (30.87)

17. गणा अप्सरसां ख्याताः पुण्यास्ते वै चतुर्दश ।
आहूताः शोभयन्तश्च गणा इत्यते चतुर्दश । (69.53)

18. ब्रह्मणो मानसाः मन्याः शोभन्त्यो मनोः सुताः ।
वेगवन्तस्त्वरिष्टाया उर्जायाश्चाग्निसंभवा ॥ (69.54)

19. आयुष्मत्यश्च सूर्यस्व रश्मिजाता सुभास्वराः ।
गर्भतेश्च सोमस्य ज्ञेयास्ते कुरवः शुभाः ॥ (69.55)

20. यज्ञोत्पन्नाः शुभा नाम ऋक्सामान्यास्तु वहन्य ।
वारिणा इयमृतोत्पन्ना अमृता नामतः स्मृताः ॥ (69.56)

21. वायुत्पन्ना युदा नाम भूमिजात्रा भवास्तु वै
विद्युतश्च रूचो नाम मृत्यो कन्याश्च भैरवाः ॥ (69.57)

22. शोभयन्त्यश्च कामस्य गणाः प्रोक्ताश्चतुर्दश ।
सेन्द्रोपेन्द्रैः सुरगणै रूपातिशय निर्मिताः ॥ (69.58)

23. ध्वनुरूपा महाभागा दिव्यानारी तिलोत्तमा ।
ब्रह्मणश्चाग्नि कुण्डाच्च देवनारी प्रभावली ॥ (69.59)

24. रूपयौवनसम्पन्ना उत्पन्ना लोका विश्रुता ।

25. वेदीतलसमुत्पन्ना चतुर्वक्त्रस्य धीमतः ।
नाम्ना वेदवती नाम सुरनारी महाप्रभा ॥ (69.60)

26. तथा यमस्य दुहिता रूपयौवनशालिनि।
वरहेमनिभा हेमा देवनारी सुलोचना ॥ (69.61)

27. इत्येते बहुसाहस्रं भास्वराः ह्यप्सरोगणाः।
देवतानामृषीणां च पत्न्यस्ता मातरश्च ह ॥ (69.62)

28. सुगन्धाश्चम्पवर्णश्च सर्वाश्चाप्सरसः सभाः।
संप्रयोगे तु कान्तेन माधन्ति मदिरा विना ॥
तासामाप्यायते स्पर्शादानन्दश्च विवर्धते। (69.63)

29. चतुस्त्रिंशद्धवीयस्यस्तेषामप्सरसः शुभाः।
अन्तरा दारवत्या च प्रियमुख्यां सुरोत्तमा। (69.4)

30. मिश्रकेशी तथा चाशी वर्णिनी वाऽप्यलम्बुषा।
मारीचि पुत्रिका चैव विद्युद्वर्णा तिलोत्तमा ॥ (69.5)

31. अद्रिका लक्षणा चैव देवी रम्भा मनोरमा।
सुवरा च सुबाहुश्च पुर्णिता सुप्रतिष्ठिता ॥ (69.6)

32. पुण्डरिका सुगन्धा च सुदन्ता सुरसा तथा।
हेमा सारदवती चैव सुवृत्ता कमल च या। (69.7)

33. सुभुजा हंसपादा च लैकिक्योऽप्सरसस्तथा।
गन्धर्वाप्सरसो ह्येता मौनयाः परिकिर्तिताः ॥ (69.8)

34. एवमादिनी देवीनां सहस्राणि च षोडश।
चतुर्दश तु ये प्रोक्ता गणाश्चाप्सरसां दिवि ॥ (96.235)

(V.) विष्णुपुराण

35. धाता कृतस्थली चैव पुलस्त्यो वासुकिस्तथा।
रथकृद ग्रामणीर्हेतिस्तुम्बुरुश्चैव सप्तम ॥

36. एते वसन्ति वै चैत्रे मधुमासे सदैव हि।
मैत्रेय स्यन्दने भानोः सप्तमासाधिकारिणः ॥

37.

37. अर्यमा पुलहश्चैव रथौजाः पुञ्जिकस्थला ।
प्रेहतिः कच्छनीरश्च नारदश्च रथे रवेः ।
माधवे निवसन्त्येते शुचिसंज्ञे निबोध मे ॥

38. मित्रोऽत्रिस्तक्षको रक्षः पौरुषेयोऽथ मेनका ।
हाहा रथस्वनश्चैव मैत्रेयेतेवसन्ति वै ॥

39. वसिष्ठो वरुणो रम्भा सहजन्याः हुहूर्बुधः ।
रथचित्रस्तथा शुक्रे वसन्त्याषाढसंज्ञिते ॥

40. इन्द्रो विश्वासुः स्रोत एलापुत्रस्तथाऽंशः ।
प्रम्लोचा च नभस्येते सर्पिश्चार्के वसन्ति वै ॥ (10.9)

41. विवस्वानुग्रसेनश्च भृगुराप्रुरणस्तथा ।
अनुम्लोचा शङ्खपालो व्याघ्रो भाद्रपदे तथा ॥ (10.10)

42. पूषा वसुरुचिर्वातो गौतमोऽथ धनञ्जयः ।
सुषेणोऽन्यो घृताची च वसन्त्याश्वयुजे रवौ ॥ (10.11)

43. विश्वावसु भरद्वाजः पर्जन्यैरावतौ तथा ।
विश्वाची सेनजिच्चापा कार्तिके वसन्ति वै ॥ (10.12)

44. अंशकाश्यपतार्क्ष्यसहसु महापद्म तथोर्वशी ।
चित्रसेनस्तथा विद्युन्मार्गशीर्षेऽधिकारिणः ॥ (10.13)

45. क्रतुर्भगस्तथोर्णायुः स्फूर्जः कर्कोटकस्तथा ।
अरिष्टनेमिश्चैवान्या पूर्वचित्तिर्वराप्सराः ॥ (10.14)

46. पौषमासे वसन्त्येते सप्तभास्करमण्डले ।
लोकप्रकाशनार्थाय विप्रवर्याधिकारिण ॥ (10.15)

47. त्वष्टाथ जमदग्निश्च कम्बलोऽथ तिलोत्तमा ।
ब्रह्मापेतोऽथ ऋतजिद् धृतराष्ट्रोऽथ सप्तमाः ॥ (10.16)

48. माघमासे वसन्त्येते सप्त मैत्रेय भास्करे ।
श्रुयतां चापरे सूर्ये फाल्गुने निवसन्ति ये ॥ (10.17)

49. विष्णुरश्वतरो रम्भा सूर्यवर्चाश्च सत्यजित् ।
विश्वामित्रस्तथा रक्षो यज्ञोपेतो महागुनेः ॥ (10.18)